## युष्मदस्मद्भ्यां ङसोऽश्। (२७/३११)

युष्मद् अस्मद् इत्येताभ्यामुत्तरस्य ङसः अश् इत्ययमादेशो भवति। तव स्वम्। मम स्वम्। शित्करणं सर्वादेशार्थम्। अन्यथा हि आदेशव्यपदेशप्रक्लृप्त्यर्थमादेरेव स्यात्, ततश्च 'योऽचि' (७.२.८९/३१२) इत्येतन् न स्यात्॥

## ङे प्रथमयोरम्। (२८/३८२)

ङे इत्यविभक्तिको[1] निर्देशः। ङे इत्येतस्य प्रथमयोश्च विभक्त्योः प्रथमाद्वितीययोः युष्मदस्मद्भ्यामुत्तरयोः अम् इत्ययमादेशो भवति। तुभ्यं दीयते। मह्यं दीयते। प्रथमयोः[2] – त्वम्। अहम्। युवाम्। आवाम्। यूयम्। वयम्। त्वाम्। माम्। युवाम्। आवाम्॥

## शसो न। (२९/३९१)

युष्मदस्मद्भ्यामुत्तरस्य शसो [3]नकारादेशो भवति। युष्मान् ब्राह्मणान्। अस्मान् ब्राह्मणान्। युष्मान् ब्राह्मणीः। अस्मान् ब्राह्मणीः। [4]युष्मान् कुलानि। अस्मान् कुलानि[5]॥

## भ्यसो भ्यम्। (३०/३९८)

युष्मदस्मद्भ्यामुत्तरस्य भ्यसः भ्यम् इत्ययमादेशो भवति। युष्मभ्यं दीयते। अस्मभ्यं दीयते। भ्यमादेशे कृते शेषेलोपे च 'बहुवचने झल्येत्' (७.३.१०३/२०५) इति एत्वं प्राप्नोति, तत् 'अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य' (व्या. प. ३८) इति न भवति। केचित् पुनरभ्यमादेशमेत्वनिवृत्त्यर्थं [6]कुर्वन्ति। येषां तु शेषेलोपः टिलोपः, तेषामभ्यमादेश एव[7]। [8]उदात्तनिवृत्तिस्वरश्चादेरेव भवति॥

## पञ्चम्या अत्। (३१/३९७)

पञ्चम्याः भ्यसः युष्मदस्मद्भ्यामुत्तरस्य अत् इत्ययमादेशो भवति। युष्मद् गच्छन्ति। अस्मद् गच्छन्ति॥

## एकवचनस्य च। (३२/३९६)

पञ्चम्या एकवचनस्य युष्मदस्मद्भ्यामुत्तरस्य अत् इत्ययमादेशो भवति। [9]त्वद् गच्छन्ति। मद् गच्छन्ति॥

---

1. अयम् इत्यधिकम् इ. ई. 2. खल्वपि इत्यधिकम् क. 3. न इत्ययमादेशः क. 4. युष्मान् ब्राह्मणकुलानि अस्मान् ब्राह्मणकुलानि ब. क. इ. ई. 5. तस्माच्छसो नः पुंसि इति सिद्धे स्त्रीनपुंसकार्थं वचनम्। अलिङ्गे वा युष्मदस्मदी इत्यधिकम् ड. प. मं. 6. इच्छन्ति क. इ. 7. अयम् इत्यधिकम् क. 8. तदा तु इत्यधिकम् क. 9. त्वद् इच्छति मद् इच्छति ब. क. ड. ह.